Devbhoomi Journal of Multidisciplinary Research (DJMR)
URL: www.usvv.ac.in/djmr Email: djmr@usvv.ac.in
Volume-1, Issue-1, Jan – June 2023

# तीर्थेषु हरिद्वारस्य वैशिष्ट्यम्

**डॉ.शैलेशकुमारतिवारी**
संकायाध्यक्षः,विभागाध्यक्षश्च
वेद-वेदांग संकाय: उ.स.वि.वि, हरिद्वारम्

**उपक्रमः-**

निखिलेऽपि वसुधापटले भुवनमुकुटमणिरिव विराजमाना विद्यन्ते भारतभूमिरियमिति नाविदितं तज्ज्ञानाम् यत्र नैकविधानि भव्यानि दिव्यानि च तीर्थानि पुण्यक्षेत्राणि, नद्यो नदा, नगर्यो. धमानि, पर्वताः, वृक्षाः, वनानि, कुण्डा, सरोवराः, सिद्धपीठादीनि च स्थानानि च सन्ति, येषु सेवनदर्शनस्नानदानध्यानपूजापाठसाधनोपासनादिविविधधार्मिकसांस्कृतिकादिक्रियाकलापानुष्ठानेन जना आत्मानं सौभाग्यभाजं मन्यमानाः सकललौकिकाभीष्टफलं साधयन्तः परमोत्तमलोकभगवत्सारूप्यमुक्यादिप्रयोजकपुण्यपुञ्जं समर्जयन्ति। भूतलेऽस्मिन् अन्ये भूभागा भोगक्षेत्रं किन्तु भारतभूभागः कर्मक्षेत्रमपि। अत्र स्थित्वेतो देवादिदुर्लभं मोक्षपदं सुलभं तदीप्सुनामिति विदितो विषयः। अत एवास्यां भुवि देवा अपि जनिमभिलषन्ति अत्र जातान् मुहुर्मुहुः प्रशंसन्ति च। न्यगादि च-

**"अहो अमीषां किमकारि शोभनं**
**प्रसन्न एषां स्विदुत स्वयं हरिः।**
**यैर्जन्मलब्धं नृषु भारताजिरे**
**मुकुन्दसेवौपयिकं स्पृहा हि नः।।"**
**"कल्पायुषां स्थानजयात् पुनर्भवात्**
**क्षणायुषां भारतभूजयो वरम्।**
**क्षणेन मर्त्येन कृतं मनस्विनः**
**संन्यस्य संयात्यभयं पदं हरेः।।[1]"**

अन्यत्रापि **"गायन्ति देवाः किल गीतकानि..."** इत्यादि भूरिभूरि प्रशंसितोऽयं भूभागो भारतनामेति निर्विचिकित्सम्। भारतस्यापि शिरोभागो देवभूमिः वर्तते। यत्रानेकानि तीर्थानि विलसन्ति। तीर्थशब्दः तृधातोः "तरति पापादिकं यस्मादित्यादिविग्रहे "पातृतुदिवचीति[2]" इति सूत्रेण थक् प्रत्यये कृते सति निष्पद्यते, तदनु पुण्यस्थानादयोऽनेके अभिधीयन्तेन तीर्थपदेन। तत्र पापाद्यपाकारकपुण्यादिप्रदायक तीर्थेष्वपि मामसतीर्थ-शरीरतीर्थ-भौमतीर्थाद्यनेके भेदा वर्तन्ते। तेषु पुष्करप्रयागादिषु

[1] श्रीमद्भागवते 5- 21,23
[2] उणादि 2,7

भौमतीर्थेषु हरिद्वारस्य किञ्चिदनितरसाधारणवैशिष्ट्यं वर्तते, तदेवातिसमासेनेह शोधपत्रे प्रस्तूयते। तथाहि-

**हरिद्वारम्-**

विविधदृष्ट्या हरिद्वारस्य महत्त्वं वैशिष्ट्यं च वरीवर्ति। तत्र पद्मपुराणानुसारेण यदा विकरालकलिकालप्रभावाद् भगवद्वल्लभपुत्रौ ज्ञानवैराग्यनामानौ जर्जरौ मरणासन्नावजायेताम्, तदा नारदप्रार्थनया सनकादिभिः प्रथमतः इहैव श्रीमद्भागवतसप्ताहकथायोजनेन तौ पुनर्जीवितौ तरुणौ कृतौ च। तदुक्तम्-

**"गङ्गाद्वारसमीपे तु तटमानन्दनामकम्।**
**नाना ऋषिगणैर्जुष्टं देनसिद्धनिषेवितम्।**
**नाना तरुलताकीर्णं नवकोमलबालुकम्।।**[3]"

अत्रैव सर्वेषां ब्रह्मविष्णुमहेश्वरादीनां पुरतो ज्ञानवैराग्यसहिता भक्तिः कलावपि मुदितमनाः सिद्धकामा सती ननर्त। तदुक्तम्-

**"भक्तिसुतौ तौ तरुणौ गृहीत्वा,**
**प्रेमैकरूपा सहसाविरासीत्।" इति**
**"ननर्त मध्ये त्रिकमेव तत्र"**[4]**। इत्यादि च**

इत एव श्रीमद्भागवतसप्ताहकथावाचनस्य परम्परा प्रसिद्धिमगात्। प्रसिद्धो विदुरमैत्रेयसंवाद इहैव जातो यत्र अप्रतिमं तत्त्वं न्यरूपि-

**"द्वारिद्युनद्या ऋषभः कुरूणां**
**मैत्रेयमासीनमगाधबोधम्।**
**क्षत्तोपस्तन्याच्युतभावशुद्धः**
**प्रपच्छ सौशील्यगुणाभितृप्तः।।**[5]"

अनेकेषु शास्त्रेषु पुराणादिषु हरिद्वारस्यानेकदृष्ट्या महिमा प्रतिपादितो वर्तते।

हरिद्वारस्य नामानि- अस्य हरिद्वारस्य अन्यान्यनेकानि नामान्युलभ्यन्ते। तत्रोक्तं विद्यते-

**"हरिद्वारं हरद्वारं गङ्गाद्वारं तथैव च।**
**ब्रह्मद्वारं मोक्षद्वारं पञ्चद्वारं नमाम्यहम्।।"** इति

एतेन हरेः(बदरीनाथादेः) हरस्य(केदारनाथादेः) गङ्गायाः ब्रह्मणो मोक्षस्य च द्वारत्वात् पञ्च नामानि प्रसिद्धानि सन्त्येव। स्वर्गद्वारमपि निगद्यते।

तथाहि –

---

[3] भा.मा. 3,4-5

[4] भा.मा 3-67, 6-87

[5] श्रीम.भा. 3-5-1

**"गङ्गाद्वारोत्तरं विप्र स्वर्गभूमिः स्मृता बुधैः।**
**अन्यत्र पृथिवी प्रोक्ता गंगाद्वारोत्तरं विना।।**
**इदमेव महाभाग स्वर्गद्वारं स्मृतं बुधैः।**
**यस्य दर्शनमात्रेण विमुक्तो भवबन्धनैः।।**
**ब्रह्मविष्णुमहेशाद्या देवा नित्यं प्रतिष्ठिताः।**
**मुनयः सिद्धगन्धर्वा गुह्यकाप्सरसां गणाः**
**तिष्ठन्त्यत्रैव भगवनञ्छेतुं संसारबन्धनम्।।**
**संसारतापतप्तानां भेषजं तीर्थमुत्तमम्।**
**पापानि शतसंख्यानि ब्रह्महत्यासमानि च।।**
**कृत्वान्यत्र प्रयान्त्यस्मिन् मृता मोक्षवाप्नुयुः**[6]**।।"** इति

अर्थात् प्रतिष्ठितब्रह्मविष्णुमहेश्वरमुनिसिद्धगन्धर्वादिदेवं दर्शनमात्रेण ब्रह्महत्याप्रभृतिपापतापादिपशमनपुरस्सरभवबन्धनभेदनचणं तीर्थमिदं स्वर्गद्वारं वर्तते, यतो हीतः उत्तरभूमि: स्वर्गभूमिः तद्द्वारमिदमिति। अस्य तीर्थस्य प्राचीनं नाम माया, मायाक्षेत्रं, मायापुरी इत्यादि वर्तते । तत्र दक्षप्रजापतेः कन्यारूपेणावतीर्णीया भगवत्या जगदम्बायाः मायाया दक्षयज्ञे शिवापमानवशात् दग्धशरीराया निधनवृत्तं निशम्य क्रुद्धेन भगवता महेश्वरेण प्रादुर्भावितवीरभद्रादिगणद्वारा सयज्ञदक्षस्य विनाशे जाते. पुनः ब्रह्मादिप्रार्थनया शान्तेन तुष्टेन च शिवेन दक्षादिजीवनदाने सति दक्षद्वारा स्वतः प्रार्थितश्च भगवान् महेश्वरः क्षेत्रमिद तीर्थीकुर्वन्त्वस्य नाम मायाक्षेत्रं विदधै। तत्रोक्तं भगवता महादेवेन दक्षं प्रति -

**"भविष्यत्येव हि तथा यथा याच्या कृता त्वया।**
**इंद क्षेत्र महापुण्यं यावद्वै यज्ञभूमिका।।**
**यत्र मायानिमित्तं हि जाते सर्वं प्रजापते।**
**तस्मादिदं महाक्षेत्रं मायासंज्ञं भविष्यति।।**
**सकृद्दर्शनमात्रेण तस्य तीर्थस्य मानद।**
**कोटिजन्मकृतेभ्यस्तु पापेभ्य परिमुच्यते ॥**
**पृथिव्यां यानि तीर्थानि तेषां श्रेष्ठतमं स्मृतम्।**
**यस्य संस्मरणादेव सर्वपापैः प्रमुच्यते**[7]**।।** इति

अतोऽस्य तीर्थस्य नाम मायाक्षेत्रं यत्राद्यापि भगवती मायादेवी विराजते। ततश्च गङ्गाया आगमनेनास्प महत्त्वं ततोऽप्यधिकं समजनि। न्यगादीदं भगवता स्कन्देन –

**"इदं तीर्थ महापुण्यमभूद् गंगागमे पुनः।**

---

[6] के.पु. 106-4,5,6,7
[7] के.पु. 105,78-81

**गंगाद्वारमिति ख्यातं स्मरणात् पापनाशनम्[8]॥"** इति

गङ्गाया आगमनान्तरमेवास्य नाम गङ्गाद्वारमिति। उक्तञ्च तत्रैव-

**"स्वर्गन्निपातिता गङ्गा पृथिव्यामागता यदा।**
**तदेवास्य द्विजश्रेष्ठा गङ्गाद्वारमिति श्रुतम्[9]।।"** इति

एवमेव अन्यान्यपि नामानि तद्विषयक कथादीनि च यत्र तत्र शास्त्रेषु वर्णितानि सन्ति।

**हरिद्वारतीर्थक्षेत्रविस्तारः-**

अस्य हरिद्वाराद्यपरपर्यायकमायातीर्थक्षेत्रस्य विस्तारः कियान्, सीमा वा कियती वर्तते इति नारदेन पृष्टो भगवान् कुमार उत्तरयन्नाह-

**"मायाक्षेत्रं समाख्यातं गङ्गाद्वारे सुपुण्यदम्।**
**ब्रह्मणः स्थानतो यावत्योजनानां त्रिकद्वयम्[10]।।**
**मायाक्षेत्रं हि यत्प्रोक्तं तथा द्वादशयोजनम्।**
**तद्ब्रूहि प्रथमं देव विस्तरेण मम प्रभो[11]।।**
**ततोऽवधि महाभाग मायाक्षेत्रं बभूव ह।**
**त्रिषु लोकेषु पुण्यं च यत्र माया सतीवपुः।।**
**द्वादशयोजनायामं यज्ञस्यायतनं द्विज।**
**तत्प्रमाणं महाभाग बभूव क्षेत्रमुत्तमम्।।**
**अस्मिन् क्षेत्रेऽर्ध मासेन शिवसंन्यमानसः।**
**प्राप्नोति शिवसायुज्यं किमन्यैर्बहुभाषितैः[12]।।"**

इत्यादीनि नैकवचनानि समुपलभ्यन्ते, यदनुसारेण मायाक्षेत्रस्य विस्तारो द्वादशयोजनमिति निश्चीयते। अस्मिन् मायाक्षेत्रेऽनेकानि तीथानि स्थानानि वा विराजन्ते यत्र स्नानदानादिना विशिष्टं फलमाप्यते। तद्यथा-

**मायाक्षेत्रीयप्रमुखतीर्थानि-**

क्षेत्रेऽस्मिन् अनेकानि तीर्थानि, लिङ्गानि, कुण्डाः, गुहा पुण्यस्थानानि च वर्तन्ते, येषां महत्त्वं वैशिष्ट्यं चाप्रतिमं विद्यते। तत्र गङ्गाया पूर्वभागे नीलपर्वतो विद्यते यत्रोपरि चण्डीदेवी देदीप्यते, सहैवाग्रे किञ्चित नीलेश्वरमहादेवो विराजते। अत्र पर्वतस्य नाम नीलपर्वतमिति कथं जातम्, कथं वा नीलेश्वरमहादेवस्येहा विर्भाव इत्यत्रैका कथा प्राप्यते केदारखण्डपुराणे। तदनुसारं कश्चिद् अवन्त्यां गृहीतजन्मा सार्थनामा अश्मचित्तापरनामा ब्राह्मणो भ्रष्टसंस्कारः चौर्यादिनिन्दितवृत्तिद्वारा जीवनं यापयन् अन्त्यन्तं नीलकर्मा

[8] के.पु.106-1
[9] के.पु.106,3
[10] के.पु 102, 6
[11] के.पु. 102,9
[12] के.पु. 105, 26-27

बभूव। कदाचिदसौ सगणो हरिद्वारं मायाक्षेत्रमागतः। तत्रार्धरात्रौ चौरैः सहायमपि कुरूपो भ्रष्टकर्मा अश्मचित्ताख्यो ब्राह्मणः चौर्यकर्म कर्तुं निर्गतः सन् भगवच्चर्चां कुर्वन्तं ब्राह्मणसमुदायं वीक्ष्य तद्धनापहरणबुद्ध्या ब्राह्मणवेशं परिधाय छलेन भगवच्चर्चानिरतब्राह्मणसमुदाये प्रविवेश। तत्र मायाक्षेत्रप्रभाववशात् ब्राह्मणसमुदायद्वारा क्रियमाणभगवच्चर्चावशाच्च निजापराधबोधो जातः। ततश्चाश्मचित्तो विकलमाना कृतानि पापानि स्मरन् अत्यन्तं दुःखितः सन् आत्मकल्याणाय ब्राह्मणसमुदयं निवेदयामास। ते ब्राह्मणाः परिचयं प्राप्य अश्मचित्तं सम्बोधयन् यदये अश्मचित्त अस्मिन् मायाक्षेत्रे त्वं प्रविष्टवान् एतावतैव कृतकृत्य जातोऽसि, तव सर्वाण्यपि पापानि नष्टानि जातानि सन्ति। अतश्चिन्तां मा कुरु गङ्गाया पूर्वदिग्भागे स्थिते पर्वते गत्वा भगवन्तं महेश्वरमाराधय इति। ततः पर्वते समागत्याश्मचित्तो भगवतो महेश्वरस्य तपोऽतप्यत। तपसा प्रसन्नो भगवान् आशुतोषः दर्शनं सर्वा अष्टादशविद्याश्च ददौ। ततोऽधिगतसकलविद्येन दिव्यशक्तिसम्पन्नेन अश्मचित्तेन स्तुतो भगवान् शंकरः तं प्रमथेश्वररूपेण अर्धनामकगजरूपेणच प्रतिष्ठापयन् पर्वतराजस्य नाम नीलपर्वत इति चकार। तथा च तस्य महत्त्वमभिवर्धयन् नीलेश्वरमहादेवरूपेण समवस्थितो जातः। तदुक्तम् आशुतोषेण-

**"गच्छ गच्छ हि कैलासं प्रमथेश्वरतां व्रज।**
**तुष्टोऽस्मि स्तवराजेन कृतभक्त्या च विप्रक।।**
**ममार्धनामको भूयाद गणश्च द्विजसत्तम।**
**नाम्ना नील इति ख्यातिं भुवि यास्यति चोत्तमाम्॥**
**अस्य वै गिरिराजस्य नाम वै सम्भविष्यति।**
**नीलपर्वत इति वै स्मरणाच्छिवदायक।।**
**अत्र वै निवसिष्यामि त्वया सह गणेश्वर।**
**नीलेश्वर इति ख्यातो भक्तानां प्रीतिवर्धनः।।**[13]" इति

अद्यापि चण्डी देव्या अगे अधस्ताद् अयं नीलेश्वरमहादेवो विराजते। तस्य महिमा "जलमात्रं च यो मर्त्यो मम लिङ्गे प्रदास्यति" इत्यादिना भूरिभूरि गीतो वर्तते।

**कनखलतीर्थम्**- मायाक्षेत्रान्तर्गतं कनखलतीर्थमपि महत्त्वपूर्णं स्थानं बिभर्ति। खलोऽपि स्नात्वात्र मुक्तिं भजते, नरोऽत्र स्नानेन कनकवद् दिव्यत्वमाप्नोति। अतोऽस्य तीर्थस्य नाम कनखलमिति। तन्न्यगादि केदारखण्डपुराणे-

**"स्नात्वा कनकवद्भाति नरो याति पवित्रताम्।**
**अतः कनखलं तीर्थं ख्यातं तत्तीर्थमुत्तमम्।।**
**खलः को नाम मुक्ति वै नाप्नुयात् तत्र मज्जनात्।**
**अतः कनखलं तीर्थं नाम्ना चक्रुर्मुनीश्वराः॥**[14]"

[13] के.पु. 106, 73-76

अस्य तीर्थस्य महिमानं वर्णयतोच्यते-

**ततः कनखले स्नात्वा त्रिरात्रं चोषतो नरः।**
**अश्वमेधमवाप्नोति स्वर्गलोकं च गच्छति।।**

अस्मिन्नेव तीर्थे दक्षप्रार्थनया प्रसन्नो भगवान् शिवो दक्षेश्वरमहादेवरूपेण विराजमानो भक्तानां सकलाभीष्टं साधयति । तन्महत्त्वविषये तद्वैशिष्ट्यविषये च निगदितम्-

**"दक्षेश्वरं महादेवं दृष्ट्वा वै भक्तितत्परः।**
**कृतकृत्यो भवेन्मर्त्यो धन्यतां याति सत्वरम्**[15]**।।"**
**"दक्षेश्वरं महादेवं सकृदेव प्रणमन्ति ये।**
**नन्दिभृंग्यादिभिस्तुत्यो भूयान्मानवसत्तमः**[16]**।।"**
**"धन्यास्ते पुरुषा लोके मायाक्षेत्र निवासिनः।**
**नाम्ना दक्षेश्वरेणैव निवसिष्यामि क्षेत्रके**
**यस्य दर्शनमात्रेण सिद्धयोऽष्टौ भवन्ति हि** [17]**।।"** इति

**बिल्वकेश्वरतीर्थम्**- मायाक्षेत्रान्तर्गतं बिल्वपर्वताख्यं स्थानं वर्तते, यत्र पर्वतस्य अधो भागे बिल्ववृक्षस्य (इदानीमयं वृक्षो नोपलभ्यते) नीचे बिल्वेश्वरनाम्ना बिल्वकेश्वरनाम्ना वा महादेवो दिव्यलिङ्गरूपेण राराज्यते, यस्य दर्शनार्चनादेर्महिमा शास्त्रेषु अनेकत्र वर्णितो वर्तते। तत्राश्वतरनागस्य ऋचीकमुनेरन्येषां चापि तपस्विनां स्थानमपि वर्तते। कलिङ्गजस्य राज्ञो विश्वदत्तकस्य योगादिज्ञानमिहैवावाप्तम्,तद्विषया कथापि पुराणे समुपलभ्यते। एतत्तीर्थमाहात्म्यविषये प्रोक्तम्-

**"बिल्वपर्वतमाहात्म्यं शृणु नारदभक्तितः।**
**तच्छ्रुत्वापि द्विजश्रेष्ठ पुण्यं प्राप्नोति दुर्लभम्।।**
**तत्रैको बिल्ववृक्षस्तु तस्याधः शिवलिङ्गम्।**
**यस्य दर्शनमात्रेण शिवतां याति मानवः।।**
**गंगायां स्नानमात्रेण बिल्वतीर्थे नरोत्तम।**
**कोटिजन्मकृतैः पापैस्तत्क्षणात् परिमुच्यते।।**
**बिल्वेश्वरं महादेवं बिल्वपत्रैस्तु योऽर्चयेत्।**
**यथासंख्यैर्बिल्वपत्रैः स वसेत् कल्पकोटिभिः।।**
**त एव धन्या मनुजा शिवरात्रे प्रयान्ति ये।**
**बिल्वेश्वरं महादेवं बिल्वपत्रैरनेककैः**[18]**।।"**

---

[14] के.पु. 109, 20
[15] के.पु. 102,18
[16] के.पु. 105, 89
[17] के.पु. 105, 82-83
[18] के.पु. 107, 1,3,45,47

अत्रैवैकस्याः शिवधाराया अपि वर्णनं माहात्म्यं चाधिपुराणमवलोक्यते। तथाहि-

**“शिवधारा समाख्याता शिवदा तत्र पर्वते।**
**तस्यां नरः सकृत् स्नात्वा शिवेन सदृशो भवेत्**[19]**।।”** इति

अर्थात् अस्यां शिवधारायां सकृत्स्नानेनापि शिवसादृश्यं प्राप्तुं शक्यते। भगवती दक्षपुत्री सती वररूपेण शिवस्य प्राप्तयेऽत्र बिल्वपत्रं भुक्त्वा तपश्चकारेत्यपि श्रूयते । अद्यापि गौरीकुण्डावलोकन तत्र कर्तुं शक्यते।

**ब्रह्मकुण्डतीर्थम्-**

मायाक्षेत्रेऽधिगंगाद्वारं “हर की पैड़ी” इत्याख्ये पुनस्थले ब्रह्मकुण्डतीर्थं वर्तते इति जानन्ति प्रायो जनाः। तद्विषये केदारखण्डपुराणे निगद्यते-

**“इदं तीर्थं महापुण्यं त्रैलोक्ये चातिदुर्लभम्।**
**अतः परञ्च मन्नाम्ना विख्यातं हि भविष्यति।।**
**ये स्नास्यन्त्यत्र कुण्डे गच्छेयुस्ते परं पदम्।**
**यत्कर्म क्रियते चात्र तत्सर्वं स्यादनन्तकम्**[20]**।।”**

अद्यापि महान् जनसम्मर्दोऽनुदिनं समुपस्थितो भवति, अनेकानि च गंगादेवी प्रभृतिदेवमन्दिरादि तत्र विराजन्त इति जानन्ति सर्वे। कुम्भपर्वावसरे सन्यासिप्रभृतीनां मुख्यस्नानमिहैव भवति। सोमशर्मणे भगवान् विष्णुरत्रैव स्वीयां दुर्ज्ञेयां मायां प्रदर्शयामास। अतोऽपि नामास्य तीर्थदण मायाक्षेत्रमिति प्राप्यते। तन्महत्त्वादिविषये स्वयं भगवता नारायणेन सोमशर्माणं प्रति प्रोच्यते-

**“अतः परं महाभाग मे माया सा दुरत्यया।**
**व्यापयिष्यति त्वां नैव यथा संसृज्यते जगत्।।**
**इदं च परमं स्थानं संसारातपनाशनम्।**
**माया ते दर्शिता यद्वै ततो मायाभिधन्विदम्।।**
**तीर्थं पापवनाग्निर्वै सद्यः शुद्धिकरं स्मृतम्।**
**ये नराः पिण्डदानं हि करिष्यन्ति महाशयाः।।**
**तेषां गयाश्राद्धशतैः किं कर्तव्यं कृतैस्तथा।**
**दानमत्र कुरुक्षेत्रवृद्धितोऽष्टगुणं तथा।।**
**मायाकुण्डे तथा स्नानं कोटिकोटिगुणं भवेत्।**
**स्नानं दानं जपो होमः स्वाध्यामः पितृतर्पणम्।**
**सर्वं कोटिस्तथा कोटी भविष्यति न संशयः।।**

[19] के.पु. 107,2
[20] के.पु. 111, 9-10

Devbhoomi Journal of Multidisciplinary Research (DJMR)
URL: www.usvv.ac.in/djmr Email: djmr@usvv.ac.in
Volume-1, Issue-1, Jan – June 2023

**माया कुण्डमिदं मायाक्षेत्रे श्रेष्ठतमं स्मृतम्[21]।।"**

**कुशावर्ततीर्थम्-**

ब्रह्मकुण्डस्य दक्षिणे भागे कुशावर्ततीर्थं वर्तते। पुरा एकपादेन स्थितः सन् महातपा दत्तात्रेयो वर्षाणामयुतं यावत् तपश्चकार। तत्क्रमे गंगाया आगमने सति तत्प्रवाहे दत्तात्रेयमुत्रे कुशादिसामग्री गंगावर्ते निमग्ना। ततः क्रुद्धो दत्तात्रेयो गंगां भस्मीकर्तुं प्रयतते तावद् ब्रह्मादिदेवा आगत्य दत्तात्रेयं सम्बोधयन्तः समस्तुवन्।

**"अत्रैव भवतां स्थानं नित्यं स्यात् तीर्थकेवरे।**
**आवर्तनाद्यतो गया कुशान् धृतवती मम।।**
**कुशावर्त्तमिति ख्यातं तीर्थमेतद्भविष्यति।**
**धन्या लोकाः करिष्यन्ति स्नानं पितृसमर्चनम्।।**
**तत्पितृणां च तस्यापि न स्माज्जन्म पुनः क्वचिद्।**
**कुशावर्ते महातीर्थे दत्तं स्यात् कोटिसंख्यकम्[22]।।"**

इति न्यवेदयद् दत्तात्रेयः। तत आरभ्यास्य तीर्थस्यापि महत्त्वं समधिकं समजायत। तदुच्यते भगवता कार्तिकेयेन-

**"कुशावर्तं महातीर्थं दक्षिणेब्रह्मतीर्थतः।**
**तत्र स्नात्वा महाभाग न च भूयोऽभिजायते।।**
**स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम्।**
**यदत्र क्रियते कर्म तत्तत्स्यात् कोटिसंख्यकम्[23]।।"**

अत एतेषां पञ्चानां प्रमुखतीर्थानां विषये निगदितम्-

**"गंगाद्वारे कुशावर्ते बिल्वके नीलपर्वते।**
**स्नात्वा कनखले तीर्थे पुनर्जन्मन विद्यते[24]।।"**

एवमेव विष्णुतीर्थ-ललितकतीर्थ(ललतारो)-सप्तसामुद्रिकतीर्थ-मुण्डमालेश्वरी-नारायणीशिला-रम्भाकुण्ड-सप्तर्षि-भीमस्थल(भीमगोडा)-भ्रामरीदेवी-त्रिमूर्तीश्वरमहादेव-मनसादेवीप्रभृतीनि ततः परं कुब्जाम्रक-हृषीकेश(ऋषिकेश)-भरतमन्दिर-वाराहमन्दिर-माहेश्वरीपीठ-वीरभद्रेश्वर-चन्द्रेश्वर-सोमेश्वर-कौमुदतीर्थ-सार्षपकतीर्थ-अग्नितीर्थ-तपोवनतीर्थ-रामेश्वरमन्दिर-लक्ष्मणमन्दिर-लक्ष्मणकुण्ड-शेषनाग-मुनिकुण्ड-सरस्वतीधारा- इन्द्रकुण्ड-वायुकुण्ड-नन्दीशिला-द्रोणक्षेत्रप्रभृतीनि चानेकानि तीर्थानि पुण्यस्थानानि च मायाक्षेत्रे वर्तन्ते, येषां महत्त्वं वैशिष्ट्यं कथादिकं चाधिपुराणादिशास्त्रं प्रतिपादितं वर्तते। एतेषु बहूनि

---

[21] के.पु. 118, 111-116
[22] के.पु. 112,8-10
[23] के.पु. 112 1-2
[24] के.पु. 105,15

तीर्थान्यद्यापि संज्ञातानि सन्ति यत्र जनाः पुण्यमर्जयन्ति सहैवाधुनिकान्यपि अनेकानि मन्दिराणि धामानि आश्रमाः दर्शनीयस्थानानि च विलसन्तीह।

**हरिद्वारमहिमा-**

समासेन पूर्वोक्ताद् नैकविधवैशिष्ट्यादेव हरिद्वारस्य महिमा सर्वत्र गीयते। द्वारस्तम्भयोरिव गंगामुभयतः स्थितयोः पर्वतयोः मनसादेवी चण्डदेवी चेति शक्तिद्वयं तीर्थस्यास्य वैशिष्ट्यं समेधयत्येव। अस्यतीर्थस्य महिमानं गायता केदारखण्डपुराणेन प्रोच्यते-

**“धन्यानां पुरुषाणां हि गंगाद्वारस्य दर्शनम्।**
**विशेषतस्तु मेषार्कसंक्रमेऽतीव पुण्यदे।।**
**तत्रपि कुम्भराशिस्थे वाक्पतौ सुरवन्दिते।**
**अयने विषुवे चैव संक्रान्तौ सूर्यचन्द्रयोः।।**
**ग्रहणे वा व्यतीपाते पूर्णिमायां महामुने।**
**सोमवारान्वितायां वा यस्यां कस्यामथापि वा।।**
**अमायां च तथा माघे वैशाखे कार्तिकेऽपि वा।**
**तिस्रः कोट्योऽर्धकोटी च तीर्थानां मुनि सत्तमा**
**भजन्ते सन्निधिं तत्र स्नातः सर्वत जायते**[25]**।।”**

हरिद्वारे निवासस्यापि महत्फलं प्रदर्शितं पूर्वजैः। यथोक्तम्-

**“त्रिषुस्थानेषु ये मर्त्या निवसन्ति महामुने।**
**गंगाद्वारे तथा काश्यां गंगासागरसंगमे।।**
**न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि**[26]**।।”**

अस्मिन् विकराले कलिकाले पञ्चक्षेत्राणामवस्थानं वर्तत एवेत्यपि तत्रैव निगदतोच्यते-

**“क्षेत्राणां पंचकं पृथ्व्यां स्थास्यति प्रवरे कलौ।**
**गंगाद्वारं च केदारं काशी गंगागमस्तथा।।**
**गंगा च समेता यत्र सागरेण महामते।**
**गंगापि स्थास्यतेऽत्रैव सत्यमेतच्छिवेरितम्**[27]**।।”**

अन्यत्रापि निगगिते – “सर्वत्र सुलभा गंगा त्रिषु स्थानेषु दुर्लभा” इत्यत्र हरिद्वारस्यापि स्थानं वर्तते।

**कुम्भपर्वदृष्ट्या महत्वम्-**

[25] के.पु.109, 13-17
[26] के.पु. 109, 12
[27] के.पु. 109 17-18

यत्र कुम्भपर्व समायोज्यते तासु चतसृषु नगरीषु हरिद्वारस्य प्रमुखं स्थानं वर्तते।

**"पद्मिनी-नायके मेषे कुम्भराशिगते गुरौ।**
**गंगाद्वारे भवेद् योगः कुम्भनामा तदोत्तमः।।**
**वसन्ते विषुवे चैव घंटे देवपुरोहिते।**
**गंगाद्वारेच कुम्भाख्यः सुधामेति नरो मतः।।**
**कुम्भराशिगते जीवे यद्दिने मेषगे रवौ।**
**हरिद्वारे कृतं स्नानं पुनरावृत्तिवर्जनम्।।"**

इत्यादिभिः प्रभूतैर्वचनैः हरिद्वारे समायोज्यमानस्य कम्यपर्वणो महिमा वर्णितो वर्तते। एतद्विषयको मदीयः "धार्मिक दृष्टि से कुम्म का महत्त्व" इत्याख्यः उत्तराखण्डसंस्कृताकादमीद्वारा विस्तृतो लेख प्रकाशितो वर्तते। तत्र द्रष्टुं शक्यते।

**मोक्षदायिसप्तपुरीषु हरिद्वारम्-**

मोक्षदायकत्वेन सप्त पुर्यः प्रसिद्धाः सन्ति, तासु माया- पदाभिधस्य हरिद्वारस्य अन्यतमं स्थानं वर्तते। तदुक्तम् –

**"योध्या मधुर माया काशी काञ्ची अवन्तिका।**
**पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः।।"** इति

अत्रापि हरिद्वारस्य कीदृशं स्थानम् इति विषये प्रोच्यते-

"विष्णोः पादमवन्तिकां गुणमयीं मध्ये च काञ्चीपुरीं
नाभिं द्वारवतीं तथा च हृदयं मायापुरीं पुण्यदाम्।
ग्रीवामूलमुदाहरन्ति मथुरां नासां च वाराणसीं,
एतद् ब्रह्मपदं वदन्ति मुनयोऽयोध्यापुरी मस्तकम्।। इति

अर्थात् भगवतः परमेश्वरस्य अवन्तिका पादः (पादतुल्या) वर्तते, काञ्चीपुरी मध्यस्थानं, द्वारकापुरी नाभिः, मायापुरी हृदयं, मथुरा ग्रीवामूलं, वाराणसी नासिका, तथा अयोध्या मस्तकं वर्तत इति । तत्र शरीरावयवेषु हृदयस्य कीदृशं स्थानं महत्वं च भवतीति नाविदितम्। तद्वदत्रापि हृदयस्थानीयस्य हरिद्वारस्य वैशिष्ट्यं महत्त्वं वा ज्ञातुं शक्यते।

**निष्कर्षः-**

अत्र धार्मिकदृष्ट्या तीर्थेषु हरिद्वारतीर्थस्य वैशिष्ट्यं समासेन सामान्य दृष्ट्या च प्रत्यपादि। एवमेव अन्याभिरपि नानादृष्टिभिः हरिद्वारस्य महत्त्वादिकं वर्तत इति जानन्ति विज्ञाः । अतो हरिद्वारे स्थितानां तीर्थानां लाभोऽवश्यं ग्राह्याः, लुप्तानां तीर्थानां च समुद्धारो विधेयः। इत्यलम्